Shri Raghunath Temple MSS. Library,
JAMMU

No. १३००

Title अनुमिति परामर्श कार्य-कारण भाव विचारः

Author रघुदेव भट्टाचार्यः

Extent १२ Age १६६८

Subject न्याय वैशेषिकं

अनुमितिपरामर्शकार्यकारणभाव
विचारः

१३००

न्याय

उ.अ.प.म.वा. श्रीगणेशाय नमः॥ परामर्शं विनाऽनुमितेरनुदयादनुमितिं प्रति परामर्शो हेतुरिति सिद्धान्तः तत्र धूमपरामर्शसत्वे घटानुमित्यनुदया
१ त् पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति पर्वतविशेष्यकवह्निव्याप्यधूमादिप्रकारकनिर्णयो हेतुरिति विशिष्यैव कार्यकारणभावः
अथ वह्निव्याप्यालोकवान् पर्वत इत्यादिपरामर्शादपि पर्वतो वह्निमानित्यनुमितेरुदयात् तत्र धूमपरामर्शहेतुतायां व्यभिचार इति चे
न्न तादृशव्यभिचारवारणाय धूमपरामर्शजन्यतावच्छेदककोटौ धूमलिंगकत्वस्य निवेशात् तत्र धूमलिंगकत्वं न तावद् धूमपरामर्शज
न्यत्वं स्वजन्यतावच्छेदककोटौ स्वजन्यत्वस्य निवेशादात्माश्रयप्रसंगात् न च धूमलिंगकत्वं जातिविशेषः तादृशजातिसिद्धिश्च धूम
परामर्शजन्यतावच्छेदककोटिप्रविष्टत्वेनेति वाच्यम् तुल्ययुक्त्या आलोकपरामर्शजन्यतावच्छेदककोटिप्रविष्टालोकलिंगकत्वस्या
पि जातित्वेन तयोः प्रत्येकपरामर्शजन्यानुमितौ परस्परव्यभिचारेण धूमालोकाद्युभयलिंगकपरामर्शजन्यानुमितौ एकत्र स
मावेशात् तथा तद्द्वय धूमलिंगकत्वस्य सांकर्यप्रसंगात् न चोभयलिंगकपरामर्शजन्यानुमितौ तादृशजातिद्वयास्वीकारेण नोक्त
दोष इति वाच्यम् तत्र तादृशजातिद्वयास्वीकारे अनुमित्यनुदयप्रसंगात् न च तत्रोभयलिंगकत्वाख्यामेकां जातिं स्वीकृत्योभय
लिंगकानुमितिं प्रति उभयलिंगकपरामर्शत्वेन हेतुत्वस्य कल्पनीयतया तत्र तथाविधानुमित्युत्पत्तौ बाधकाभाव इति वाच्यम्
तथापुभयलिंगकानुमितौ तादृशजातिद्वयसत्वे बाधकाभावेन तत्रोपदर्शितरीत्या सांकर्यवारणस्याशक्यत्वात् न च तत्तज्जात्यवच्छिन्नं प्र
ति तथाविधोभयलिंगकपरामर्शत्वेन प्रतिबंधकत्वकल्पनादुभयलिंगकानुमितौ उभयोरसमावेशात् नोपदर्शितसांकर्यमिति वाच्यं १

तादृशप्रतिबध्यप्रतिबंधकभावकल्पनेनोपदर्शितकार्यकारणभावकल्पनादिनाच गौरवमिति नच धूमलिंगकत्वं धूमलिंगकानुमितौ विष
यताविशेषः तादृशविषयतायां प्रमाणाभावात् एवं तुल्यपुरुषीयपरामर्शादावपि वन्ह्यादिनिरूपितविलक्षणविषयतां स्वीकृत्य तस्यापि व
न्ह्यादिनिरूपितविलक्षणविषयताशालिनिश्चयत्वेन हेतुत्वकल्पनस्यौचित्यात् तथाऽनुमितिजनकतावच्छेदककोटौ व्याप्त्यादिनिवेशे प्रयोज
नाभावाच्च कश्चित्तु धूमलिंगकत्वं धूमपरामर्शाव्यवहितोत्तरक्षणोत्पत्तिकत्वं अव्यवहितोत्तरत्वं च स्वाधिकरणक्षणध्वंसाधिकरण
क्षणध्वंसानधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वं सत्यंतनिवेशादतीतधूमपरामर्शानंतरं दशमक्षणोत्पन्नालोकलिंग
कपरामर्शजन्यानुमितौ न व्यभिचारः विशेष्यदलनिवेशात् धूमपरामर्शपूर्वक्षणोत्पन्नालोकलिंगकपरामर्शजन्यानुमितौ न व्यभिचा
र इत्याहुः तदसत् तथासति धूमपरामर्शतृतीयक्षणोत्पन्नानुमितेर्धूमपरामर्शजन्यतावच्छेदकानाक्रांतत्वप्रसंगात् तत्र तृतीयक्षणस्य
स्वाधिकरणप्रथमक्षणध्वंसाधिकरणीभूतो यो द्वितीयक्षणः तद्ध्वंसाधिकरणत्वस्य सत्वात् नच स्वाधिकरणक्षणध्वंसाधिकरणक्षण
ध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वमेवाव्यवहितोत्तरत्वं वक्तव्यं तथा सति नोपदर्शितानुपप
त्तिः तत्र स्वाधिकरणप्रथमक्षणध्वंसाधिकरणीभूतो यो द्वितीयक्षणस्तद्ध्वंसाधिकरणीभूतो यस्तृतीयक्षणस्तद्ध्वंसानधिकरणत्वस्य स
त्वात् इति वाच्यम् तथाप्यपेक्षाबुद्ध्यात्मकधूमपरामर्शस्य तृतीयक्षणस्थायितया तच्चतुर्थक्षणोत्पन्नानुमितेरसंग्रहप्रसंगात् नच स्वाधि
करणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वमे
वोच्यतामिति वाच्यम् तथासति धूमपरामर्शचतुर्थक्षणोत्पन्नालोकलिंगकपरामर्शजन्यानुमितौ व्यभिचारस्य दुर्वारत्वादिति साधि

धूमपरामर्शत्तत्तीयक्षणोत्पन्नानुमितेरसंग्रह इति भावः ॥

तिकृतस्तु स्वध्वंसाधिकरणक्षणध्वंसानधिकरणत्वे सति स्वाधिकरणक्षणध्वंसाधिकरणत्वमव्यवहितोत्तरत्वं वक्तव्यं धूमपरामर्शत्तत्तीय
क्षणोत्पन्नानुमितेर्धूमपरामर्शध्वंसाधिकरणीभूततत्तीयक्षणध्वंसानधिकरणीभूततत्तीयक्षणोत्पन्नतया नासंग्रहः एवमन्यत्रापीत्या
हुः तदसत् स्वपदस्य धूमपरामर्शसामान्यपरत्वे तत्तद्धूमपरामर्शपरत्वे वा बाधः सर्वस्यैव क्षणस्य स्वपूर्वोत्पन्नधूमपरामर्शध्वंसाधिकर
णतया तद्ध्वंसानधिकरणक्षणस्याप्रसिद्ध्या तादृशकार्यतावच्छेदकाप्रसिद्धेः नोत्पत्तः तत्तद्व्यक्तिभेदेनानुमितिपरामर्शयोः कार्यका
रणभावस्यावश्यकतया तत्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुत्वमस्तु किमव्यवहितोत्तरत्वादिनिवेशेनेति नाकिंचिदेतत् केचित्तु
स्वसामानाधिकरण्यस्ववृत्ति प्रागभावप्रतियोगित्वकालिकविशेषणता एतत्त्रितयसंबंधेन धूमपरामर्शवत्त्वमेव धूमलिंगकत्वं अत्र
स्वत्वं परिचायकमात्रं न तु कार्यतावच्छेदकताघटकसंबंधनिविष्टं एकवृत्ति प्रागभावप्रतियोगित्वादेरन्यसंबंधत्वाभावात् नातोव्यक्ति
त्वावसरः आलोकपरामर्शजन्यानुमितौ कालिकविशेषणताद्यारितेतत्त्रितयसंबंधेन न धूमपरामर्शवत्त्वं भिन्नकालीनयोरा
धाराधेयभावानभ्युपगमात् तथा च तत्र धूमपरामर्शहेतुतायां न व्यभिचार इत्याहुः तदसत् धूमपरामर्शत्तत्तीयक्षणोत्पन्नतज्ज
न्यानुमितेरसंग्रहप्रसंगात् तत्र धूमपरामर्शस्य तत्तीयक्षणेविनष्टतया कालिकविशेषणतासंबंधेन तत्तत्तीयक्षणोत्पन्नतज्जन्या
नुमितेस्तत्त्वाभावात् केचित्तु स्वसामानाधिकरण्यस्ववृत्ति प्रागभावप्रतियोगित्व स्ववृत्तिकमत्वेतत्त्रितयसंबंधेन धूमपराम
र्शवत्त्वमेव धूमलिंगकत्वं ~~स्वा~~ स्ववृत्तित्वं कृतिमत्त्वं च कालिकविशेषणताविशेषणबोध्यम् धूमपरामर्शवृत्तिकृतेरालोकपराम
र्शकालेविनष्टतया आलोकपरामर्शजन्यानुमितेः कालिकसंबंधेन तद्वत्त्वाभावेन धूमपरामर्शहेतुतायां व्यभिचाराभावात् एकपु २

रुषीयधूमपरामर्शद्वितीयक्षणोत्पन्नपुरुषांतरीयआलोकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्वसामानाधिकरण्यनिवेशः
अतीतधूमपरामर्शचतुर्थक्षणोत्पन्नालोकलिंगकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्ववृत्तिकृतिमत्त्वनिवेशः धूमपराम
र्शपूर्वक्षणोत्पन्नालोकलिंगकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्ववृत्तिप्रागभावप्रतियोगित्वनिवेशः नचस्वव
त्तिइच्छादिमत्त्वमादाय विनिगमनाविरह इति वाच्यम् इच्छादेः सार्वकालीनत्वे मानाभावेन यस्मिन्क्षणे इच्छादिकं नोत्पन्नं तत्क्षणो
त्पत्तिपरामर्शजन्यानुमितेरसंग्रहप्रसंगात् नच सर्वदा कृतिमत्त्वे किं मानमिति वाच्यम् जीवनान्यथानुपपत्त्या जीवनयोनियत्न
स्येव सार्वकालीनत्वात् नचैतथापीश्वरकृतिमादायालोकपरामर्शजन्यानुमितेरपि तादृशत्वनयसंबंधेनातीतधूमपरामर्शवत्त्व
यातत्र धूमपरामर्शहेतुतायां व्यभिचार इति वाच्यम् स्वाधिकरणीभूतकृतिमत्त्वस्य संबंधत्वात् स्वाधिकरणत्वं च कालिक
विशेषणतासंबंधेन ईश्वरकृतेर्नित्यतया कालिकविशेषणतासंबंधाभावेन न तदादायोपदर्शितरीत्या धूमपरामर्शहेतुता
यां व्यभिचार इत्याहुः तदपि न समीचीनमाभाति जीवनयोनियत्ने मानाभावात् नच जीवनयोनियत्नास्वीकारे प्राणपंच
कसंचारान्यथानुपपत्तिरिति वाच्यम् अदृष्टवदात्ममनःसंयोगादेव प्राणपंचकसंचारोपपत्तेः नच जीवनयोनियत्नास्वी
कारे सर्वदा आत्मसमवेतोत्पत्तेर्वारणाय आत्मसमवेतत्वावच्छिन्नं प्रति आत्मत्वेन हेतुतायां इतरकारणस्य सहकारित्वं क
ल्पनीयं तत्स्वीकारे तु सर्वदा इष्टापत्त्या तादृशापत्त्यसंभवेन तत्रेतरकारणसहकारित्वस्याकल्पनादिति वाच्यम् संततयापरि
स्पंदमानपवनपरमाणुसंयोगादेः सर्वदा आत्मनि स्वीकारेण ममापि तत्रेतरकारणसहकारित्वस्याकल्पनादिति

दृ.अ.प.म.वा.

३

3

केचित्तु स्ववृत्तिप्रागभावप्रतियोगित्वविशिष्टं यत्स्वसामानाधिकरण्यं तद्विशिष्टं यत्स्ववृत्तिप्रागभावप्रतियोगित्वसंबंधावच्छिन्नधूमप
रामर्शनाशनिष्ठप्रतियोगितावच्छेदकताकभेदाधिकरणीभूतक्षणोत्पत्तिकत्वं तेन तेन संबंधेन तथाविधत्वं तत्तत्संबंधेन वा धूमपरामर्श
वत्त्वमेव धूमलिंगकत्वं आलोकपरामर्शद्वितीयक्षणस्य स्ववृत्तिप्रागभावप्रतियोगित्वसंबंधेनातीतधूमपरामर्शनाशवत्तया तत्र
तद्वैशिष्ट्याभावेन तत्क्षणोत्पन्नालोकपरामर्शजन्यानुमितेस्तादृशभेदाधिकरणक्षणोत्पत्तिकत्वघटितत्वतत्संबंधेन धूमपरामर्शवत्त्वा
भावात् न तत्र धूमपरामर्शहेतुतायां व्यभिचार इति न च आलोकपरामर्शद्वितीयक्षणस्यापि स्ववृत्तिप्रागभावप्रतियोगित्वसंबं
धावच्छिन्नधूमपरामर्शनाश आलोकपरामर्शद्वितीयक्षणोभयनिष्ठप्रतियोगितावच्छेदकताकभेदवत्तया तत्संबंधावच्छिन्नधूम
परामर्शनाशनिष्ठावच्छेदकताकभेदवत्त्वेन तत्क्षणोत्पन्नानुमितौ धूमपरामर्शहेतुतायां व्यभिचारस्य दुर्वारत्वादिति वाच्यम् ता
दृशभेदे स्वावच्छिन्नप्रतियोगिताकत्व स्वभिन्नधर्मावच्छिन्नप्रतियोगिताकत्वोभयसंबंधेन प्रतियोगितावच्छेदकवद्भेदस्य विशेष
णत्वान्नानुपपत्तिलेशोऽपीत्याहुः तदपि न मनोहरं एतादृशधूमलिंगकत्वस्य धूमपरामर्शजन्यतावच्छेदककोटिनिवेशे गौरवात्
न चान्यथानुपपत्त्या तादृशगौरवं न दोषायेति वाच्यं प्रकारांतरस्यानुपदमेव वक्ष्यमाणत्वात् अत्राहुः हेतुतावच्छेदकविषयता
मनिवेश्य लाघवात् साध्याभाववद्वृत्तित्वरूपव्याप्तिविशिष्टवत्तावगाहिनिश्चयत्वरूपपरामर्शत्वेनानुमितिं प्रति हेतुतया पर्वतोद्देश्यकसं
योगसंसर्गकवह्निविधेयकानुमितिं प्रति वन्ह्यभाववद्वृत्तित्वरूपव्याप्तिविशिष्टवत्तावगाहिनिश्चयत्वेन हेतुत्वकल्पनात् आलोकलिंगक
परामर्शजन्यानुमितौ धूमलिंगकपरामर्शहेतुतायां व्यभिचारः तत्रानुमितेः पर्वतदभाववद्वृत्तित्वविशिष्टवत्तावगाहि आलोक

परामर्शस्य सत्वात् अपसाध्याभाववद्वृत्तित्वविशिष्टवत्त्वावगाहिनिश्चयत्वेन हेतुत्वमतेपि पर्वते समवायादिसंबंधेन संयोगसंबंधा
वच्छिन्नप्रतियोगिताकवन्ह्यभाववन्निरूपितसंयोगसंबंधावच्छिन्नेयवृत्तित्वं तादृशवृत्तित्वत्वावच्छिन्नाभावविशिष्टधूमवत्वस्यानिश्च
यसत्वे संयोगसंसर्गकपर्वतोद्देश्यकवन्हिविधेयकानुमित्यापत्तिः नचेष्टापत्तिः यत्संबंधावच्छिन्नसाध्याभाववद्वृत्तित्वे हेताव
वगाहते यज्ञानं पक्षे तेन संबंधेन तद्वत्तावगाहिज्ञानादनुमितेरानुभविकत्वादिति संयोगसंबंधावच्छिन्नप्रतियोगिताकवन्ह्यभा
ववद्वृत्तित्वविशिष्टनिष्ठाया संयोगसंबंधावच्छिन्नाप्रकारतातच्छालिनिर्णयत्वेन संयोगसंसर्गकवन्हिविधेयकानुमितिं प्रति प्र
तु६ तिहेतुत्वकल्पनस्यावश्यकतया यत्र समवायादिसंबंधावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वविशिष्टसमवायादिसंबंधावच्छि
न्नप्रकारतातच्छालिनिर्णयादनुमितिस्तत्र संयोगसंबंधावगाहिधूमपरामर्शहेतुतायां व्यभिचारस्य दुर्वारतया तत्संबंधावगा
हिपरामर्शजन्यानुमितौ उपदर्शितत्रितयसंबंधेन तत्संबंधावगाहिपरामर्शवत्वनिवेशस्यावश्यकत्वात् इति चेन्न तत्संबंधावच्छि
न्नतदभाववद्वृत्तित्वं तदभाववन्निरूपिततत्संबंधाभाव एव तथा च संयोगसंसर्गकवन्हिविधेयकानुमितिं प्रति वन्ह्यभावव
न्निरूपितसंयोगाभावविशिष्टनिष्ठायाः संयोग संयोगसंबंधावच्छिन्नप्रकारतातच्छालिनिर्णयत्वेन हेतुत्वं कल्प्यते तदेवोपदर्शि
तस्यलेव्यभिचारवारणार्थं तत्संबंधावगाहिपरामर्शजन्यतावच्छेदककोटौ उपदर्शितत्रितयसंबंधेन तत्संबंधावगाहिपरामर्श
वत्वानिवेशः तदेव न किंतु स्वावच्छेदकावच्छिन्नत्वस्वानिरूपितविषयतानिरूपिताभाववन्निष्ठविषयतानिरूपितत्वेतद्वितयसं
बंधेन पर्वतत्वावच्छिन्नविशेष्यतानिरूपितसांसर्गिकविषयताविशिष्टाया प्रतियोगितासंबंधावच्छिन्नविषयतानिरूपिताथ

व्य.प्र.प.म.पा.
४
५

करणविषयतातन्निरूपिताभावविषयतानिरूपितसंयोगसंबंधावच्छिन्नप्रतियोगितासंबंधावच्छिन्नवन्ह्यादिप्रकारताशालिनिर्णी
यत्वेनसंयोगसंसर्गकवन्हिविधेयकानुमितौहेतुत्वस्यकल्पनीयतयाव्यभिचाराभावेन परामर्शजन्यतावच्छेदककोटौउपदर्शित
त्रितयसंबंधेपरामर्शवत्वनिवेशप्रयोजनविरहात् संबंधभानेसंबंधतावच्छेदकभानानंगीकारे तु धूमपरामर्शत्वेनसामाना
धिकरण्यसंबंधेनवन्हिविधेयकानुमितिंप्रतितादात्म्यादिसंबंधेनधूमपरामर्शहेतुत्वंकल्प्यते नचैवंसतिव्यभिचारः कार्याव्य
वहितपूर्वक्षणावच्छेदेनकार्यतावच्छेदकसंबंधेनकार्याधिकरणेकारणतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताककारणाभाव
सत्वस्यैवव्यभिचारपदार्थत्वात् प्रकृतेतुतथाविधसंबंधेनानुमित्याधिकरणेधूमपरामर्शेधूमपरामर्शभेदासत्वेनव्यभिचा
राभावात् एतेनालोकपरामर्शजन्यानुमितौव्यभिचारवारणाय धूमपरामर्शजन्यतावच्छेदककोटौउपदर्शितत्रितयसंबंधेन
धूमपरामर्शवत्वनिवेशस्यावश्यकतयापरामर्शजन्यतावच्छेदककोटौअनुमितित्ववन्हिविधेयकत्वादीनांप्रवेशेप्रयोजनाभा
वः नचकार्यतावच्छेदककोटौअनुमितित्वाद्यनिवेशेधूमपरामर्शाव्यवहितक्षणोत्पन्नघटात्मसंयोगेव्यभिचारः तादृशसंयोगस्या
प्युपदर्शितत्रितयसंबंधेनधूमपरामर्शवत्तयातदधिकरणीभूतघटेधूमपरामर्शाभावादितिवाच्यं कार्यतावच्छेदकविशिष्टकार्याधि
करणेकार्याव्यवहितपूर्वक्षणावच्छेदेनकारणाभावसत्वस्यैवव्यभिचारपदार्थत्वात् तत्रैवाविशिष्टाधिकरणत्वंयत्राविशिष्टबु
द्धिनियामकसामानाधिकरण्यघटकीभूतविशेषणविशेष्यसंबंधाभ्यांविशेषणविशेष्योभयवत्वं यथानुमित्याकमान्यत्वविशि
ष्टसत्ताधिकरणत्वंद्रव्येएव नचसामानाधिकरण्यघटकीभूतविशेषणविशेष्यसंबंधाभ्यांविशेषणविशेष्योभयसत्वात् ४

ते

प्रकृते परामर्शवैशिष्ट्यनियामकसामानाधिकरण्यघटकीभूतसमवायसंबंधाभ्यां परामर्शतद्विशेष्ययोः अधिकरणत्व
११ पत्रत्वं तत्र च धूमपरामर्शविशिष्टाधिकरणत्वं प्रकृते च समवायेन घटे धूमपरामर्शसत्त्वात्तत्र धूमपरामर्शविशिष्टाधिकरणत्वं
इति तद्वृत्तित्वाभावेन घटात्मसंयोगाभावे व्यभिचारः। न च सामानाधिकरण्यसंबंधेन धूमपरामर्शपरामर्शवैशिष्ट्यस्य धूमपरामर्श
कार्यतावच्छेदककोटौ निवेशो धूमपरामर्शतृतीयक्षणोत्पन्नानुमितेरसंग्रहः तत्र तृतीयक्षणे धूमपरामर्शाभावेन तत्क्ष
णोत्पन्नानुमितौ तद्वैशिष्ट्याभावेन हि ति धूमपरामर्शोपलक्षितत्वावच्छिन्नं प्रति धूमपरामर्शो हेतुः। तथा च व्यभिचा
रस्तदवस्थ एवेति वाच्यं। धूमपरामर्शजन्यतावच्छेदककोटौ ज्ञानत्वस्य निवेशात्। न च विनिगमनाविरहेणानुमितित्वा
देर्निवेशो आपाद्यत इति वाच्यं। अनुमितित्वादेर्निवेशे वह्न्याद्यापत्तिं प्रति वह्निव्याप्यवत्तानिर्णयस्य हेतुत्वांतरकल्पनेन
निर्वाहात् प्रत्यक्षत्वेककार्यकारणभावेनैवोपपत्तेः। अथ वह्निविधेयकेसादृः परामर्शजन्यतावच्छेदककोटौ वा निवेशो
पत्र घटं व्याप्यवान् वह्निव्याप्यवांश्चेति समूहालंबनात्मकः परामर्शः अथ च दृढं ज्ञानं धूमाभाववति धूमप्रकारकमि
त्यप्रामाण्यज्ञानं तत्र तादृशपरामर्शद्वितीयक्षणोत्पन्नयद्यनुमितौ व्यभिचारवारणाय तादृशाप्रामाण्यज्ञानव्यक्तीनां प्रभा
वाः तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाः धूमपरामर्शजन्यतावच्छेदककोटौ निवेशनीयः तथा च तादृशाभेदकूटं निवेश्य

५ कार्यकारणभावकल्पने गौरवं मन्मते तु वह्निविधेयकानुमितेरनुदयेन धूमपरामर्शजन्यतावच्छेदकावच्छिन्नस्य धूमप
रामर्शं विनाऽनुदयेन व्यभिचाराभावेन तत्तदप्रामाण्यज्ञानव्यक्तीनामभावाः ऽनुगतधर्मावच्छिन्नप्रतियोगिताका एवानुमिति श्री
जनकतावच्छेदककोटौ + धूमपरामर्शजन्यतावच्छेदककोटौ न निवेशनीया इति लाघवमिति चेन्मैवं अप्रामाण्यज्ञानव्य
क्तीनामभावाः ऽ+ निवेशनीयः न तु अननुगततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकाभावाः तदनुपदमेवोपपादयिष्यते त
था च वह्निविधेयकत्वादेर्निवेशे गौरवावकाशादित्यपि परास्तं धूमपरामर्शकार्यतावच्छेदककोटौ धूमपरामर्शविशिष्य
मनिवेश्यैवानुमितिपरामर्शयोः कार्यकारणभावप्रकारस्य प्रदर्शितत्वात् तत्रानुमितित्वादेर्निवेशानिवेशप्रयुक्तलाघ
वगौरवविचारोऽसंगत इति ध्येयं ० धूमपरामर्शज्ञानकाले इदं ज्ञानं धूमाभाववति धूमप्रकारकमित्याद्यप्रामाण्यज्ञा
नसत्त्वे पर्वतो वह्निमानित्यनुमितेरनुदयात् धूमपरामर्शादिजनकतावच्छेदककोटौ तथाविधाप्रामाण्यग्रहाभावो निवे
शनीयः अथ किंसंबंधावच्छिन्नप्रतियोगिताकः अप्रामाण्यग्रहाभावो निवेश्यते न च समवायसंबंधावच्छिन्नप्रतियोगिता राम०
काप्रामाण्यग्रहाभावः तथा सति अप्रामाण्यग्रहकाले ऽपि तत्संबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्य पराम ५
र्शे सत्त्वात् अप्रामाण्यग्रहाभावविशिष्टपरामर्शस्याक्षततया वह्निविधेयकानुमितेः आपत्तिर्दुर्वारैव न च समवायघटि

तसामानाधिकरण्यसंबंधावच्छिन्नप्रतियोगिताकअप्रामाण्यग्रहाभावो निवेशनीय इति वाच्यं· तथा सत्येकधर्म
परामर्शे अप्रामाण्यग्रहसत्वे धर्मपरामर्शान्तरकाले पर्वतो वह्निमानित्यनुमित्यनुदयप्रसंगात्। तत्र सामानाधिकर
ण्यसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावविशिष्टधर्मपरामर्शसत्वात् इति चेन्न स्वविशेष्यत्वस्वसा
मानाधिकरण्योभयसंबंधावच्छिन्नप्रतियोगिताकाप्रामाण्यग्रहाभावस्यैवानुमितिजनकतावच्छेदककोटौ निवेशात्
यत्रैकधर्मपरामर्शे अप्रामाण्यज्ञानं अपरधर्मपरामर्शान्तरास्ति· तत्रापरधर्मपरामर्शस्याप्रामाण्यज्ञानाविशेष्यतया
विशेष्यत्वाद्विघटितोभयसंबंधावच्छिन्नप्रतियोगिताकतथाविधाप्रामाण्यग्रहाभावविशिष्टधर्मपरामर्शस्याप्यसत्
तयानुमित्युत्पत्तौ बाधकाभावः। एकपुरुषीयाप्रामाण्यग्रहसत्वे पुरुषान्तरस्य धर्मपरामर्शसत्वे पुरुषान्तरस्यानुमि
त्युत्पत्तये सामानाधिकरण्यनिवेशः। अत्र च यं धर्मं धर्मितावच्छेदकीकृत्याप्रामाण्यग्रहसत्वे धर्मपरामर्शसत्वेऽनुमित्य
नुदयोऽनुभवसिद्धः तद्धर्मितावच्छेदकाप्रामाण्यग्रहत्वावच्छिन्नप्रतियोगिताकाभावा अननुगतास्तेषां धर्मपरामर्शजन
कतावच्छेदककोटौ निवेशनीयाः न त्वननुगततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकास्तदभावाः गौरवात् प्रयोजनाभावा
च्च· एवं वह्निव्याप्यधूमवान्नवा पर्वत इत्याहार्यसंशयकाले पर्वतो वह्निमानित्यनुमितेरनुदयात् अनुमितिजनकतावच्छेदक

कोटौ निरूपितत्वं निवेशः। तत्र निष्कम्पत्वं वह्निव्याप्यधूमाभावप्रकारकत्वसति वह्निव्याप्यधूमप्रकारकज्ञानत्वं। संशायका
६ लेधूमाभावाप्रकारकवह्निव्याप्यधूमप्रकारकज्ञानासत्त्वोन्नानुमितिः। अथ वह्निविधेयकानुमितिं प्रति धूमाधभावाप्रकार
6 कवह्निव्याप्यधूमप्रकारकज्ञानासत्त्वान्नानुमितिः। अथ वह्निविधेयकानुमितिप्रति धूमाधभावाप्रका।रकवह्निव्याप्यध
मप्रकारकज्ञानत्वेन हेतुत्वे धूमाभाववान्वह्निव्याप्यधूमवांश्च पर्वत इति समुच्चयोत्तरं पर्वतो वह्निमानित्यनुमित्यनुदयप्रसं
गः समुच्चये धूमाभावस्य प्रकारत्वेन धूमाभावाप्रकारकवह्निव्याप्यधूमप्रकारकज्ञानस्य समुच्चयकालेऽसत्त्वात्। न च विरोधसं
बंधावच्छिन्नधूमाभावप्रकारताशून्यत्वं कारणतावच्छेदककोटौ निवेशनीयं। समुच्चये विरोधभानानंगीकारेण विरोधसंबंधाव
च्छिन्नधूमाभावप्रकारताशून्यत्वसत्त्वात् तदुत्तरं अनुमित्युत्पत्तौ बाधकाभाव इति वाच्यं। यत्र संशये अभावकोटौ विरोधोन
भातः तदुत्तरं पर्वतो वह्निमानित्यनुमित्युत्पत्त्यापत्तिः तत्र विरोधसंबंधावच्छिन्नधूमाभावप्रकारताशून्यवह्निव्याप्यधूम
व्या प्रकारताकज्ञानसत्त्वात्। न च वह्निव्याप्यधूमप्रकारतायां विरोधसंबंधानवच्छिन्नत्वं निवेशनीयमिति वाच्यं। यत्र विरोधाव
च्छिन्नसंयोगसंबंधेन वह्निव्याप्यधूमवत्तानिरूपितत्वे तदुत्तरं पर्वतो वह्निमानित्यनुमित्यनुदयप्रसंगः। एवं पाहशसंशये को राम०
टिद्वयमध्ये एककोटावपि विरोधेन भातः तत्र तदुत्तरं पर्वतो वह्निमानित्यनुमित्युत्पत्त्यापत्तेश्च। न च तादृशसंशयमानाभा ६

वरतिवाच्यं॰ तादृशसंशयात्मकोटिकचिद्विरोधमानमित्यादिसत्प्रतिपक्षसंबंधीपदहीयतिकालेऽवनस्यासंगतेरितिचेन्न धर्मि
तावच्छेदकसामानाधिकरण्येनोभयकोट्यवगाहिज्ञानं समुच्चयः ।। अवच्छेदकावच्छेदेनान्यतरकोट्यवगाहिज्ञानं संशयः इति नि
यमात् सामानाधिकरण्येन वह्निव्याप्यधूमवत्ताज्ञानत्वेन हेतुतायां धर्मितावच्छेदकव्यापकदैशिकविशेषणतासंबंधावच्छि
न्नधूमाभावप्रकारताशून्यत्वं निवेशनीयं॰ अवच्छेदकावच्छेदेन वह्निव्याप्यधूमवत्ताज्ञानहेतुतायां दैशिकविशेषणतावि
शेषसंबंधावच्छिन्नधूमाभावप्रकारताशून्यत्वं निवेशनीयं॰ सामानाधिकरण्येनोभयकोट्यवगाहि समुच्चयस्य सामा
नाधिकरण्येन वह्निव्याप्यधूमवत्ताज्ञानकारणतावच्छेदकाक्रान्ततया तस्मादनुमित्युत्पत्तौ बाधकाभावः ।। केचित्तु संश
येऽभयप्रकारतानिरूपिता एकैव विशेष्यता समुच्चये तूभयप्रकारतानिरूपितोभयविशेष्यता अत एव संशयस
मुच्चयोर्भेदः तथा च धूमतदभावप्रकारतानिरूपितवह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशा
लिज्ञानत्वमेव निश्चयत्वं पर्वतो वह्निमानित्यनुमितिं प्रति तेन रूपेण हेतुत्वान्न समुच्चयोत्तरानुमित्यनुपपत्तिरित्याहुः तद
सत् तथा सति पर्वते एकत्र द्वयमिति रीत्या आलोकाभाववह्निव्याप्यधूमोभयप्रकारकादालोकाभाववान्वह्निव्याप्यधूम
वानित्याकारकाज्ञानादनुमित्यनुपपत्तिः तत्र वह्निव्याप्यधूमप्रकारतानिरूपितविशेष्यतायाः आलोकाभावप्रकारतानि

१ रूपितविशेष्यतात्वात्·तत्रविशेष्यताभेदस्तीकोऽप्यालोकाभाववान्वह्निव्याप्यधूमवांश्चेतिसंग्रहालंबनाज्ञा
दृशज्ञानस्यापिवैलक्षण्यापत्तेसंभवात्·एवंसंशयोत्पत्तिकालेपितन्मयप्रकारतानिरूपितोभयविशेष्यताशालिज्ञानोत्पा
दकसामग्रीसत्वात्तन्मयविशेष्यतासत्वेबाधकाभावात्संशयादनुमित्यापत्तेश्च·नचतथाविधोभयविशेष्यताशा
लिबुद्धिप्रतिसंशयसामग्र्याः प्रतिबंधकत्वकल्पनान्नतथाविधोभयविशेष्यताशालिबुद्धित्वंतत्रेतिवाच्यं·एता
दृशप्रतिबध्यप्रतिबंधकभावकल्पनेगौरवात्·नचसंशयसमुच्चयोभेदोऽस्यानुपपत्तातादृशांशेगौरवंनदोषा
पत्तिवाच्यं·तयोर्भेदोपपत्तेप्रकारतारूपोक्तत्वात्इति·अथोपदर्शितरूपेणानुमितिप्रतिहेतुत्वेनीलपर्वतोध
माभाववान्पर्वतोवह्निव्याप्यधूमवानित्यादिनीलपर्वतत्वावच्छेदेनधूमाभावग्राहिज्ञानादनुमित्यनुपपत्तिः
नीलविशिष्टपर्वतत्वादेपर्वतत्वानतिरिक्तत्वात्तादृशज्ञानस्यपर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रका
रकत्वात्तथाविधधूमाभावनिष्ठप्रकारतायाःसत्वादिघटितानुमितिजनकतावच्छेदकानाक्रांतत्वादितिचेन्नअ ग्स०
भावनिष्ठप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायापर्वतत्वातिरिक्तधर्मानवच्छिन्नत्वरूपघटितस्यनिवेशनी १
यत्वात्·नचतथापिनीलपर्वतोवह्निव्याप्यधूमवांश्चेतिसंशयादनुमित्यापत्तिरितिवाच्यं·वह्निव्याप्यधूमप्रका

रतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतायामपि पर्वतत्वातिरिक्तधर्मानवच्छिन्नत्वरूपस्य शुद्धत्वस्य निवेशात् न
च वह्निव्याप्यधूमवान्नीलपर्वत इत्यादिज्ञानस्यासंग्रहः तस्य नीलपर्वतो वह्निमानित्याद्यनुमितौ स्यात्र अंशे हेतुत्वा
न्तंक्ताप्यनुपपत्तिः एवं पर्वतत्वनिष्ठावच्छेदकतापानिरवच्छिन्नत्वमपि निवेशनीयं नातो जातित्वेन रूपेण पर्वत
त्वं धर्मितावच्छेदकीकृत्य धूमाभावप्रकारकात् तत्त्वरूपतः पर्वतत्वं धर्मितावच्छेदकीकृत्य धूमप्रकारकज्ञानादनु
मित्यनुपपत्तिः न वा जातिमान् वह्निव्याप्यधूमवानिति संशयादनुमित्यनुपपत्तिः अथानुमितिं प्रति वह्निव्या
प्यधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेन हेतुत्वे वह्निव्याप्यो धूमः पर्वते इत्याका
रकव्याप्यमुख्यविशेष्यकाधेयतासंबंधेन पर्वतप्रकारकज्ञानादनुमित्यनुपपत्तिः तत्र वह्निव्याप्यधूमप्रकारता
निरूपितपर्वतत्वावच्छिन्नविशेष्यत्वाभावेन तादृशज्ञानादृशविशेष्यताशालिनिश्चयाभावात् न च व्याप्यमुख्यविशेष्य
कपरामर्शादनुमितिर्नाभ्युपेयते इति वाच्यं तादृशज्ञानादनुमित्यस्वीकारे व्याप्यविशेष्यकात् पक्षविशेष्यका
च्चेति दीधितिलेखनासंगतिरिति चेन्न व्याप्यविशेष्यकपरामर्शस्यापि ऽनुमितिं प्रतितत्वात् तं अंशे हेतुत्वकल्पनान्न
कोपि दोषः दीधितिकृदनुयायिनस्तु वह्निव्याप्यधूमविषयतानिरूपितपर्वतविषयताशालिज्ञानत्वेन व्याप्य

विशेष्यकपक्षविशेष्यकयोः परामर्शयोरनुगमय्यतेन रूपेणाहेतुत्वं मामनंतीति तदपरेन समं ते. तथा सति वह्निव्याप्यधूमे
८ पर्वत इत्याकारकआधेयतासंसर्गकवह्निव्याप्यधूमप्रकारकज्ञानाद्वह्निव्याप्यधूमः पर्वतवान् इत्याकारकाधिकरण
तासंसर्गकपर्वतप्रकारकज्ञानात्पर्वतो वह्निमानित्यनुमित्यापत्तिः। आधेयतासंसर्गावच्छिन्नप्रकारताभिन्नाया वह्नि
व्याप्यविषयतानिरूपिताधिकरणतासंसर्गावच्छिन्नप्रकारताभिन्नायाः पर्वतविषयतायाः शालिज्ञानत्वेन हेतु
त्वं वाच्यं। उपदर्शितज्ञानीयधूमविषयत्वपर्वतविषयत्वयोः आधेयतासंसर्गावच्छिन्नप्रकारताभिन्नत्वाधिकरण
तासंसर्गावच्छिन्नभिन्नयोस्तयोरभावान्नोपदर्शितज्ञानद्वयादनुमित्यापत्तिरिति चेन्न तथा सति वह्निव्याप्यधूमवत्पर्व
तवान्देश इत्याकारकज्ञानादनुमित्यनुपपत्तिः। तादृशज्ञानीयपर्वतनिष्ठविषयतायाः देशादिनिष्ठविषयतानि
रूपिताधिकरणतासंसर्गावच्छिन्नप्रकारतात्मकत्वेन तद्भिन्नत्वाभावात् उपदर्शितकारणतावच्छेदकानाक्रान्तत्वा
त्। केचित्तु आधेयतासंसर्गावच्छिन्नप्रकारतात्वानवच्छिन्नवह्निव्याप्यधूमविषयतानिरूपकताकापर्वतत्वाव दामं०
च्छिन्नविषयतानिरूपिताधिकरणतासंसर्गावच्छिन्नप्रकारतात्वानवच्छिन्नपर्वतविषयतानिरूपकताकापाव ८
ह्निव्याप्यधूमविषयताकत्वशालिज्ञानत्वेन हेतुता नोपदर्शितानुपपत्तिः। वह्निव्याप्यधूमवत्पर्वतवान्देश इत्याकार

कज्ञानीयपर्वतत्वविषयताद्वन्निधूमप्रकारतानावच्छेदकाक्रान्तत्वात् । ननु वह्निव्याप्यधूमवान् पर्वत इत्यादिज्ञाने इ
दं ज्ञानं धूमाभाववति धूमप्रकारकमित्यप्रामाण्यग्रहदशायां एवं वह्निव्याप्यधूमः पर्वते इत्यादिज्ञाने इदं ज्ञानं पर्वता
भाववति पर्वतप्रकारकमित्यप्रामाण्यज्ञानदशायां च पर्वतो वह्निमानित्यनुमित्यापत्तिः न च तथाविधाप्रामाण्यग्रहा
भावस्यैकत्रोपदर्शितानुमितिजनकतावच्छेदककोटौ निवेशनीयत्वात्तत्रानुपपत्तिरिति वाच्यं । तथा सत्येकविधाप्रामा
ण्यग्रहसत्त्वे अन्यविधपरामर्शसत्त्वेऽनुमित्यनुपपत्तेर्वज्रलेपत्वात् । एवं वह्निव्याप्यधूमवान् न वा पर्वत इत्याकारकसं
शयाद्वह्निव्याप्यधूमः पर्वते न वा इत्याकारकसंशयाच्चानुमित्यापत्तिः न च वह्निव्याप्यधूमाभावप्रकारकत्वरूपनि
श्चयत्वपर्वताभावप्रकारकत्वरूपनिश्चयत्वयोरेकत्रोपदर्शितानुमितिजनकतावच्छेदककोटौ निवेशनीयत्वात्तत्रा
नुपपत्तिरिति वाच्यं । तथा सति वह्निव्याप्यधूमवान् न वा पर्वतः पर्वते वह्निव्याप्यधूमश्चेत्याकारकज्ञानात् वह्निव्या
प्यो धूमः पर्वते न वा वह्निव्याप्यधूमवांश्च पर्वत इत्याकारकज्ञानाच्चानुमित्यनुपपत्तेः न च कार्यकाले बाधसंभवात्तत्रोप
दर्शितज्ञानद्वयसंभव इति वाच्यं । समानप्रकारकसमानविशेष्यकबाधनिश्चयस्यैव विशिष्टबुद्धिं प्रति प्रतिब
न्धकतयोपदर्शितज्ञानोत्पत्तौ बाधकाभाव इति चेन्न । स्वीयधूमाभाववन्निष्ठविशेष्यतानिरूपितत्वप्रकारतानिरूपितधू

९ मत्प्रकारकत्वनिष्ठविशेष्यतासंसर्गावच्छिन्नप्रतियोगिताकग्रहाभावस्य धूमविषयतापर्यवसिताभावेन न हि विशेष्यतानिरूपित
त्वप्रकारतानिष्ठविशेष्यतासंबंधावच्छिन्नप्रतियोगिताकग्रहाभावस्य च पर्वतविषयतापां निवेशेपोक्तरूपेणाकापिकोणा
भावकल्पने नैकविधाप्रामाण्यज्ञानसत्त्वेनानुमित्यनुपपत्तिः एवं संज्ञापसमञ्जसपो वेलिसरणानुरोधेन संज्ञायेभावाभा
वोभयप्रकारतानिरूपितैकविशेष्यत्वाणोकारात् एवं तन्निष्ठविशेष्यतायां धूमाधभावप्रकारत्वानिरूपितत्वं धूमनिष्ठ
विषयतापां च पर्वताभावप्रकारत्वानिरूपितत्वं निवेशनीयं मतो नोपदर्शितश्राशिकसत्तापाम्पामनुमित्यनुपपत्तिरि
त्पाहुः तदसत् उपदर्शितोभयविधाप्रामाण्यज्ञानाभावयोरुपदर्शितोभयनिष्ठपत्वयोश्चैकत्र निवेशाविशेष्यावि
शेष्यभावे विनिगमनाविरहेण कार्यकारणभावद्वैः कारणतावच्छेदकगौरवाच्च तथाविधाप्रामाण्यग्रहाभावे तथा
विधनिष्ठपत्वेच एषकूटद्वयकनिवेशपदद्वयकूटद्वयकूकापिकारणाकल्पनमेव समीचीनं न च कारणतावच्छेदकतापा
यास्सद्धन्तित्वांशीकारात् नानुपपत्तिरितिवाच्यं नानोस्संबंधावच्छिन्नापाः नानाधर्मावच्छिन्नकारणतापाः अनंगीका राम०
रात् अन्यथा अभावाद्यविसमवायादिसंबंधावच्छिन्नावच्छेदकतापतीसापत्यापत्तिरिसलमसद्ग्रहणेनेति अन्यथानु ९
मितिं प्रति उभयरूपेणाहेतुत्वे तयोः परस्परं व्यभिचार इति चेन्न अस्माहि नोत्सत्वस्य तयोजन्यतावच्छेदककोटौ

निवेशात् । केचित्तु वह्निव्याप्यधूमः पर्वत इत्याकारकात् ज्ञानात् पर्वते वह्निरिति साध्यविशेष्यकानुमितिरुत्पद्यते वह्नि-
व्याप्यधूमवान् पर्वत इति ज्ञानात् पर्वतविशेष्यकानुमितिरुत्पद्यते तथा च पर्वते वह्निरित्यनुमितित्वावच्छिन्नं प्रति
वह्निव्याप्यधूमवान् पर्वत इति परामर्शत्वेन हेतुत्वं इति क्रमेण परस्परव्याहतधर्मयोरेवोपदर्शितपरामर्शयोः कार्य-
तावच्छेदकत्वे व्यभिचाराभावात् । अव्यवहितोत्तरत्वं तदुभयत्रमतावच्छेदककोटौ न निवेशनीयमित्याहुः । तद्वत्
साध्यविशेष्यकानुमितिं प्रति साध्यतावच्छेदकप्रकारकज्ञानस्य प्रतिबन्धकत्वात् व्याप्यविशेष्यकपरामर्शात् सा-
ध्यविशेष्यकानुमितिस्वीकारोऽनुचित एव । न च तादृशप्रतिबन्ध्यप्रतिबन्धकभावे मानाभाव इति वाच्यं । तादृश-
प्रतिबध्यप्रतिबन्धकभावानङ्गीकारे हि व्याप्तिमान् पक्ष इत्याकारकानुमितिं प्रति दथियांस्तामेद इत्याकारकसाध्यसिद्धेः
स्वातन्त्र्येण प्रतिबन्धकत्वकल्पनेन लाघवात् । एवं च तादृशविशेषकार्यकारणभावे सिद्धे पदविशेषयोः कार्यकारणभा-
वोपधकविना तत्सामग्र्योरपि तिनियमवत्त्वात् अनुमितित्वावच्छिन्नं प्रति परामर्शत्वेनापि हेतुत्वं बोध्यं । न च परामर्श-
त्वस्यैक्याभावात् न तथाविधकार्यकारणभावसम्भव इति वाच्यं । अनुमितिजनकतावच्छेदककोटिप्रविष्टत्वेन प-
रामर्शत्वस्य जातित्वस्वीकारात् । न च तादृशजाते चाक्षुषत्वमादाय साङ्कर्यमिति वाच्यं । तत्र तादृशचाक्षुषोत्तरम्भा

१० नसपरामर्शाभ्युपगमेनानुमितिसंभवात्. न च चाक्षुषसामग्रीकालीनतथाविधचाक्षुषोत्तरं मानसासंभवेन तत्र फला
पलापापत्तिरिति वाच्यं. तत्र फलबलेन चक्षुर्मनोयोगादेरभावस्य कल्पनीयतया तादृशचाक्षुषसामग्र्यभावेन तदुत्तरं मा
नसोत्पादे बाधकाभावात् नोक्तफलापलापापत्तिरिति. अथ तथापि परामर्शत्वस्य स्मृतित्वव्याप्यविनिगमनाविरहः
सर्वत्र स्मरणात्मकपरामर्शादेवानुमितिसंभवात्. न च परामर्शत्वस्य स्मृतित्वव्याप्यत्वमते मानसवह्निव्याप्यवज्ज्ञा
तान स्थले स्मरणं कल्प्यं इत्यत्र तदुत्तरमनुमित्स्याभ्युपगमेष्पशाविलंबस्वीकारः मन्मतेव इतस्वीकार एव विनिगम
कमिति वाच्यं. परामर्शत्वस्य स्मृतित्वव्याप्यत्वमते संस्कारपाकारकस्मरणासंभवेनानुमितिजनकतावच्छेदकको
टौ निश्चयत्वाप्रवेशाद्युक्तलाघवसंभवेन स्मरणाविलंबस्वीकारोऽस्तीति विरहात्. न च परामर्शत्वस्य मानसत्वव्या
प्यत्वमते अनुमितिजनकतावच्छेदककोटौ निश्चयत्वाप्रवेशादिति कथं न मन्मते लाघवमिति वाच्यं. तथा सति
संशयात्मकपरामर्शादनुमित्युत्पादप्रसंगात्. न च तत्र व्याप्यवज्ज्ञाननिश्चयत्वरूपविशेषसामग्रीविरहादेवना राम०
नुमित्युत्पाद इष्टप्रसंग इति वाच्यं. तथाप्यनंतसंशये तादृशजातिसंबंधकल्पने गौरवात्. न च संशयप्रत्याहत्तेर्व सा १०
जातिरस्त्विति वाच्यं. संशये तादृशजातिसत्वे बाधकाभावात्. न च तादृशजात्यवच्छिन्नं प्रति संशयसामग्र्याः प्रति

बंधकत्वकल्पनान्न दोष इति वाच्यं। तादृशप्रतिबध्यप्रतिबंधकत्वकल्पनेनेदृङ्मानसत्वव्याप्यत्वमते गौरवप्रसंगा
त्। परं तु परामर्शत्वस्य स्मृतित्वव्याप्यत्वमतेपि स्मरणात्मकपरामर्शप्रतिबंधकक्षणादिरूपतत्तदुद्बोधकानां तत्तद्व्यक्तित्वेन
हेतुत्वकल्पने गौरवं मन्यते तु मानसपरामर्शाद्ध्यनुमित्सुसत्त्वस्मरणानुदयेन तथाविधकार्यकारणभावकल्पनेन लाघ
वसंभवात्। एवं तथाविधस्थले च्छाविशिष्टस्मरणसामग्रीकालेऽनुमित्सुसादृग्वारणायानुमित्साविरहविशिष्टस्य
स्मरणेच्छाविशिष्टतथाविधस्मरणादिरूपोद्बोधकघटितसामग्रीप्रतिबंधकताकल्पनेनापि लाघवसंभवात्त्वेति। तदस
त्। तत्र तत्क्षणोत्तरोत्पत्तेः संयोगविभागादेः पौर्वापर्यनियमाय तत्तत्संयोगत्वावच्छिन्नं प्रति तत्तत्क्षणत्वेन कारणत्वक
ल्पने गौरवात्। लाघवेन तत्तद्व्यक्त्यव्यवहितोत्तरक्षणोत्पत्तिकत्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेन हेतुत्वस्य कल्पनस्यो चि
तत्वात्। तन्न एवं तदानीं तथाविधस्मरणसंभवेन तादृशस्मरणं प्रति तत्तत्क्षणादिरूपोद्बोधकत्वादेस्तात्तत्वेन हेतुत्वं
स्मृतित्वव्याप्यत्ववादिनापि कल्प्यत इति नायं दोषः। तत्तत्क्षणादिरूपोद्बोधकाघटितायास्तथाविधस्मृतीच्छा
विशिष्टस्मृतिसामग्र्याः तथाविधोद्बोधकाघटिततथाविधस्मृतिसामग्र्यभावविशिष्टत्वावच्छिन्नं प्रति प्रतिबं
धकत्वाकल्पनात् न चैवं सति तथाविधोद्बोधकस्य कालीनस्मृतीतरकारणान्तःकाले यादृशसामग्रीबलादनुमि

तिः । तद्घटितेन यादृशोद्बोधकघटितस्मृतिसामग्रीकालेपि तादृशसामग्रीबलादनुमित्यापत्तिरिति वाच्यं तत्तत्कारणाभाववि
११ शिष्टत्वावच्छिन्नं प्रति तत्तत्कारणाभावत्वेनापि हेतुत्वकल्पनात् न च तादृशातिरिक्तकार्यकारणभावकल्पने एव तन्म
तेगौरवमिति वाच्यं तत्तत्कारणादेः पिष्टोषविधया विशेषविषयकज्ञानादिकं प्रति प्रतिबंधकतया तत्र च तत्कारणाभाव
विशिष्टत्वावच्छिन्नं प्रति तत्तदभावविशिष्टत्वेनापि हेतुतस्य कल्पनादतिरिक्तकार्यकारणभावाकल्पनादिति चेन्न ताद
शविशेषस्य सर्वथा निरूपणापत्तेः ननु तथापि परामर्शत्वावच्छिन्नमेकमतिरिक्तं जातिस्वीकारानुमितित्वावच्छिन्नं प्रति
परामर्शत्वेन हेतुताकल्पनामतेक्ष्योपदर्शितव्याप्तिरूपकारणार्थऽनुमितित्वावच्छिन्नं प्रति ज्ञानत्वेनैव हेतुत्वमस्तु ला
घवादिति चेन्न अत्र केचित् परामर्शसामान्याभावदशायामनुमितित्वावच्छिन्नानुत्पादप्रयोजकत्वं वह्निव्याप्यादिवि
षयकनिश्चयत्वावच्छिन्नाभावकूटस्यैव कर्तव्यं अनुमितित्वावच्छिन्नं प्रति परामर्शत्वेन हेतुत्वकल्पने तु तत्काले
अनुमितित्वावच्छिन्नानुत्पादप्रयोजकत्वं एकस्मिन् परामर्शत्वावच्छिन्नाभावे कल्प्यत इति लाघवात् तथाविधसामान्य राम०
कार्यकारणभावसिद्धिः न च सिध्यादिकालीनपरामर्शकालेऽनुमितावच्छिन्नानुत्पादकप्रयोजकत्वस्य तन्नद्व्यक्ती ११
न्नाभावकूटे कल्पनीयतया गौरवानवकाश इति वाच्यं कार्याभावप्रतिकारणाभावप्रयोजकत्ववत्कार्याभावाधिकरण

२२८

१२ त्वंप्रतिकारणाभावाभाधिकरणत्वस्यापिप्रयोजकत्वतपापरामर्शाभ्यस्यकालावच्छिन्नानुमितित्वावच्छिन्नाभावा
धिकरणत्वंप्रतितत्तद्भूमितवच्छिन्नाभावाधिकरणत्वप्रयोजकत्वकल्पनमपेक्ष्यतन्नक्षणावच्छिन्नअनुमितित्वावच्छि
न्नाभावाधिकरणत्वंप्रतिपरामर्शत्वावच्छिन्नाभावाधिकरणत्वस्यैकस्यप्रयोजकत्वमभ्युपगमेलाघवाद्दिसाङ्क्षः।तद्दस
त्·एतादृशप्रयोजकत्वस्यकार्यकारणभावकल्पकत्वेतुअनुमितित्वावच्छिन्नंप्रतिअनुमितत्वाविरहेणविशिष्टाप्रा
माण्याग्राह्यभावविशिष्टानुमित्सभावत्वेनाविहेतुत्वापत्तेः।तत्रापिपरामर्शाद्वितीयक्षणोसत्वानुमित्सव्याहितक्ष
णानुमितित्वावच्छिन्नाभावाधिकरणत्वंप्रतिसिसाधयिषाविरहविशिष्टनिश्चयत्वघटितसिद्धित्वावच्छिन्नाभा
वाभावाधिकरणत्वस्यगुरोः प्रयोजकत्वकल्पनापेक्षयातादृशाभावाधिकारणत्वंप्रतिअनुमित्साविरहविशिष्टअ
नुमित्सभावाभावाधिकरणत्वस्यलघोः प्रयोजकत्वकल्पनेलाघवाद्दिसलमसन्यहेणेति·।। ।।इतिश्रीन्यायाल
कारतर्कवागीशरघुदेवमहाचार्यविरचितोअनुमितिपरामर्शकार्यकारणभावविचारः।।समाप्तः।।शुभमस्तु

कार्तिकार्यागतविचार

४५।